# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-1(SEM-2) | **प्रश्नपत्रम्** - २ (New & Old) | **गुणाः** - ७० |
| **विषयः** - वास्तुशास्त्रम् | **कोड**- **CC- 424** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ११/०४/२०१९ | **सन्दर्भग्रन्थः**- मयमतम् | |

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य ससन्दर्भं सान्वयं व्याख्या कार्या ।** ०५

१ नवपङ्क्तिकराद्यावत् पक्षषोडशहस्तकम् । चतुष्पञ्चतलं प्रोक्तं चतुर्मानं सनातनम् ॥

२ पीत्वा शुद्धं पयो रात्रावुपोष्याद्दिवसे ततः । स्थपतिः शास्त्रवित् प्राज्ञः सूत्रग्राह्यारिसेवितः ॥

**प्रश्नः २ 'सुभद्रम्' उपपीठनिर्माणविधानं ग्रन्थाधारेण स्पष्टयत ।** १०

अथवा

**गर्भविन्यासे प्रथमेष्टकास्थापनविधानं दर्शयत ।**

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य ससन्दर्भं सान्वयं व्याख्या कार्या ।** ०५

१ धनशर्करया युक्तमत्यन्तं खनने खरम् । सितांशतनुतोपाढ्यं जाङ्गलं भूतलं भवेत् ॥

२ दारुस्तम्भविशालं वा सार्धं द्वित्रिगुणं तु वा । शिलास्तम्भविशालं स्याद् देवानां नैव मानवे ॥

**प्रश्नः ४ स्तम्भनिर्माणे पोतिकाविधानं ग्रन्थाधारेण वर्णयत ।** १०

अथवा

**'पद्मकेसरम्' अधिष्ठानविधानं विशदं वर्णयत ।**

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ अधो लिखितयोः कस्यचित् एकस्य ससन्दर्भं सान्वयं व्याख्या कार्या ।** ०५

१ दण्डार्धविपुलं स्वार्धं तीव्रं गोपानमूर्ध्वतः । कम्पं समान्तरं कुर्याद् वलयच्छिद्रमन्तरे ॥

२ मध्ये च दक्षिणे चैव यः सन्धिं कर्तुमीहते । मध्येऽतिदीर्घं युञ्जीयाद् दीर्घमल्पं च पूर्ववत् ॥।

**प्रश्नः ६ सन्धिभेदाः ग्रन्थाधारेण प्रदर्शनीयाः ।** १०

अथवा

**प्रस्तरकरणे कपोतस्थापनविधानं स्पष्टयत**

॥ **चतुर्थान्वितिः** ॥ (Unit-4)

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१ वेदिकाद्विगुणोत्सेधं कन्धरं शिखरोदयम् । तद्द्वित्रिगुणतुङ्गं वा वेदिकोच्चं तु वा गलम् ॥

२ अष्टास्त्राद्यष्टधाराणि हर्म्यादीनां शिरांसि हि । षडाद्याष्टिकर्णं च सम्मतं शिखराकृतिः ॥

**प्रश्नः ८ गललक्षणं ग्रन्थाधारेण स्पष्टयत ।** १०

अथवा

**ललाटभूषणं ग्रन्थाधारेण स्पष्टयत ।**

**प्रश्नः ९ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१ देवासुरकथान्वितं चित्रं द्वारे योज्यते न वा?

२ मूर्ध्नेष्टकायाः स्थानं कुत्र?

३ खदिरवृक्षः स्थूणिकालीलनिर्माणे शुभः अशुभः वा?

४ द्रव्यहीनमसम्पन्नः गर्भन्यासे किं फलम्?

५ फेला इत्युक्ते किम्?

६ मयूरः कस्य देवस्य मन्दिरस्य गर्भन्यासे स्थापनीयः?

७ प्रासादनिर्माणे उपपीठस्य स्थानं कुत्र?

८ उपपीठस्य कति भेदाः? के च ते?

९ अनुपभूम्यां स्वात्वैव जलदर्शनं भवति न वा?

१० देवालयस्य अधिष्ठानोन्मानं किम्?

११ मसूरकः इत्युक्ते किम्?

१२ द्वारार्थम् अधिष्ठानप्रतिच्छेदकरणे किं फलम्?

१३ 'निखतस्तम्भः' इत्यस्य व्याख्यां कुरुत ।

१४ स्थाणुः इत्युक्ते किम्?

१५ स्तम्भनिर्माणे पोतिकायाः स्थानं कुत्र?

०००